# आदर्शप्रश्नपत्रम् (2024-25)

**कक्षा - नवमी** **कोड न. - 049**

रोल नं० | | | | | |

# संस्कृतम्

समयः - 3 होराः ] [ पूर्णाङ्काः : 80

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 8 तथा प्रश्न 15 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना / पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

---

- **सामान्यनिर्देशाः :–**

  (i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
  (ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
  (iii) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति :–**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 10 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 24 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 19 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 17 अङ्काः |

# खण्डः 'क'

# अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत –

गोदावरीतीरे विशाल: शाल्मलीतरु: आसीत्। तत्र पक्षिण: निवसन्ति स्म। अथ कदाचित् रात्रौ कश्चित् व्याध: तत्र तण्डुलान् विकीर्य जालं च विस्तीर्य प्रच्छन्नो भूत्वा स्थितश्च। प्रातःकाले चित्रग्रीवनामा कपोतराज: सपरिवार: आकाशादेव तान् तण्डुलकणान् अपश्यत्। तत: कपोतराज: तण्डुललुब्धान् कपोतान् प्रत्याह - "कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भव:। भद्रमिदं न पश्यामि। सम्भवत: कोऽपि व्याध: अत्र भवेत्। सर्वथा अविचारितं कर्म न कर्तव्यम्।"

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(क) विशाल: शाल्मलीतरु: कुत्र आसीत् ?
(ख) व्याध: कान् विकीर्य प्रच्छन्नो भूत्वा स्थित: ?
(ग) सर्वथा कीदृशं कर्म न कर्तव्यम् ?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(क) कपोतराज: कान् प्रत्याह ?
(ख) पक्षिण: कुत्र निवसन्ति स्म ?
(ग) व्याध: कदा तण्डुलान् विकीर्य जालं विस्तारितवान् ?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1

(द) **यथानिर्देशम् उत्तरत-** ( केवलं प्रश्नत्रयम् ) 3×1=3

(क) 'प्रत्याह' अस्य पदस्य सन्धिविच्छेदपदं किम्?
(i) प्रत्य+आह (ii) प्रति+आह
(iii) प्रत्य+अह (iv) प्रत्या+अह

(ख) 'निवसन्ति' पदे कः लकारः?
(i) लृट् लकारः (ii) लोट् लकारः
(iii) लट् लकारः (iv) विधिलिङ्ग लकारः

(ग) 'विशाल: शाल्मलीतरु:' अत्र विशेषणपदं किम् अस्ति?
(i) शाल्मलीतरु: (ii) विशाल:
(iii) तरु: (iv) शाल्मली

(घ) 'व्याध:' अस्मिन् पदे का विभक्तिः अस्ति?
(i) चतुर्थी (ii) द्वितीया
(iii) तृतीया (iv) प्रथमा

## खण्डः 'ख'

## रचनात्मक-कार्यम्

2. (क) भवती रमा। विद्यालयत: शैक्षणिकभ्रमणाय भुवनेश्वरं गन्तुम् अनुमतिं धनराशिं च प्राप्तुं स्वपितरं प्रति लिखितं पत्रं मञ्जूषाप्रदत्तै: पदै: पूरयित्वा उत्तरपुस्तिकायां लिखत- 5×1=5

परीक्षाभवनम्
तिथि: - ....................

माननीया: पितृवर्या:
सादरं प्रणमामि ।


मम (1) ............. परीक्षा समाप्ता। मम विद्यालयस्य अध्यापिका: शैक्षिक (2) ................. नेष्यन्ति। एतदर्थं पञ्चशतं (3)............... दातव्यानि। यदि भवत: (4)................... स्यात् तर्हि अहमपि गच्छेयम्। अतः (5)....................... उपर्युक्तां राशिं प्रेषयित्वा माम् अनुगृहीतां कुर्यु: ।
गृहे सर्वेभ्यो मम प्रणामः।

भवतां प्रिया,
रमा

**मञ्जूषा**

| कृपया , अनुमतिः , रूप्यकाणि , भ्रमणाय , प्रथमसत्रीया |
|---|

2. (ख) निर्दिष्टचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दैः उचितरिक्तस्थानानि पूरयित्वा लिखत - 5×1=5



क. अस्मिन् चित्रे एकः .................... वृक्ष: अस्ति।
ख. जले एकः ................. स्नानं करोति।
ग. वृक्षे बहव: ............... सन्ति।
घ. चित्रे वृक्षस्य समीपे ................ अस्ति।
ङ वृक्षस्य अध: ............. नृत्यति।

**मञ्जूषा**

| नरः , मयूरः , खगाः , विशालः , तड़ागः |
|---|

# खण्डः ‘ग’

## पठित-अवबोधनम्

3. निम्नलिखितं गद्यांशं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

भ्रान्तः कश्चन बालः पाठशालागमनवेलायां क्रीडितुम् अगच्छत्। किन्तु तेन सह केलिभिः कालं क्षेप्तुं तदा कोऽपि न वयस्येषु उपलभ्यमान आसीत्। यतः ते सर्वेऽपि पूर्वदिनपाठान् स्मृत्वा विद्यालयगमनाय त्वरमाणाः अभवन्।

**अथवा**

चन्दनः - अहा ! सुगन्धस्तु मनोहरः (विलोक्य) अये मोदकानि रच्यन्ते? (प्रसन्नो भूत्वा) आस्वादयामि तावत्।

(मोदकं ग्रहीतुमिच्छति)

मल्लिका - (सक्रोधम्) विरम। विरम। मा स्पृश एतानि मोदकानि।

4. अधोलिखितश्लोकस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

(क) श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।।

**अथवा**

(ख) तुलां लौहसहस्रस्य यत्र खादन्ति मूषकाः ।
राजन्तत्र हरेच्छ्येनो बालकं नात्र संशयः ।।

5. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) जीवनं भङ्गुरं सर्वं यथायं मृत्तिकाघटः ।

(ख) विना लिप्यक्षरज्ञानं तपोभिरेव केवलम् ।

(ग) हानिस्तु तेषां हि सरोवराणां येषां मरालैः सह विप्रयोगः ।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

वृत्तं यत्नेन संरक्षेत् वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ।।

**अन्वयः :-**

1) ........................ यत्नेन संरक्षेत् वित्तमेति च 2) .......................... च। 3) .................... अक्षीणो वृत्ततः तु
4) ........................ हतो हतः ।

**मञ्जूषा**

| |
|---|
| क्षीणः , वृत्तम् , याति , वित्ततः |

6. अधः प्रदत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत - (केवलं प्रश्नत्रयम्) 3×1=3

सरितो गिरिनिर्झराश्च अमृतस्वादु निर्मलं जलं प्रयच्छन्ति। वृक्षा: लताश्च फलानि पुष्पाणि इन्धनकाष्ठानि च बाहुल्येन समुपहरन्ति। शीतलमन्दसुगन्धपवना: औषधकल्पं प्राणवायुं वितरन्ति। परन्तु स्वार्थान्धो मानव: तदेव पर्यावरणम् अद्य नाशयति।

**प्रश्नाः :-**

(क) के औषधकल्पं प्राणवायुं वितरन्ति ?
(ख) सरित: कीदृशं जलं प्रयच्छन्ति ?
(ग) मानव: किं नाशयति ?
(घ) "औषधकल्पं प्राणवायुम्" अनयो: विशेषणपदं किम् ?

7. निम्नलिखितश्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत – (केवलं प्रश्नद्वयम्) 2×1=2

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता ।।

**प्रश्नाः :-**

(क) जन्तवः केन तुष्यन्ति ?
(ख) दरिद्रता कुत्र न भवेत् ?
(ग) "जन्तवः" इत्यत्र का विभक्तिः ?

8. रेखाङ्कितपदानि आधृत्य कोष्ठकात् चित्वा प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नत्रयम्) 3×1=3

(क) वृक्षकर्तनात् शुद्धवायुः न प्राप्यते। (कस्मै / कस्मात्)
(ख) प्रकृतिः जीवनसुखं प्रददाति। (किम् / काम्)
(ग) स्वर्णकाकं निवारयन्ती बालिका प्रार्थयत्। (कम् / काः)
(घ) मल्लिका सखीभिः सह धर्मयात्रायै गच्छति स्म। (कया / काभिः)
(ङ) मोदकानि पूजानिमित्तानि रचितानि आसन्। (कानि / तानि)

9. प्रश्नपत्रे लिखितश्लोकान् विहाय '**शेमुषी भाग-1**' पुस्तकाद् एकं कण्ठस्थं श्लोकं संस्कृतभाषया लिखत। 1x4=4

## खण्डः – 'घ'

## अनुप्रयुक्त-व्याकरणम्

10. (क) व्यञ्जनसन्धेः अथवा गुणसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ख) द्वन्द्वसमासस्य अथवा तत्पुरुषसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ग) कर्मकारकस्य अथवा सम्प्रदानकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

11. यथानिर्दिष्टानि शब्दरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

क. 'राम' शब्दस्य चतुर्थी-एकवचने।

ख. 'बालक' शब्दस्य तृतीया-बहुवचने।

ग. 'लता' शब्दस्य षष्ठी-एकवचने।

घ. 'किम्' (पु.) शब्दस्य सप्तमी-बहुवचने।

ङ. 'अस्मद्' शब्दस्य सप्तमी-एकवचने।

च. 'बालक' शब्दस्य षष्ठी-बहुवचने।

12. यथानिर्दिष्टानि धातुरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

क. 'पठ्' धातोः लङ्लकारस्य मध्यमपुरुष-एकवचने।

ख. 'लिख्' धातोः लृट्लकारस्य प्रथमपुरुष-एकवचने।

ग. 'गम्' धातोः लोट्लकारस्य उत्तमपुरुष-बहुवचने।

घ. 'भू' धातोः लृट्लकारस्य प्रथमपुरुष-द्विवचने।

ङ. 'पा' ( पिब् ) धातोः लोट्लकारस्य प्रथमपुरुष-एकवचने।

च. 'सेव्' धातोः लट्लकारस्य मध्यमपुरुष-एकवचने|

13. प्रदत्तोपपदविभक्तिवाक्येषु उचितविभक्तिं कोष्ठकात् चित्वा लिखत। (केवलं प्रश्नत्रयम्) 3×1=3

क. मोहनः ................. सह वनं गच्छति। (मित्रात् , मित्रेण)

ख. रामः ..................... काणः अस्ति। (नेत्राभ्याम् , नेत्रेण)

ग. पिता ...................... कुप्यति। (पुत्रम् , पुत्राय)

घ. .................... उभयतः वृक्षाः सन्ति। (ग्रामात् , ग्रामं)

ङ. अलम् ..........................। (विवादेन , विवादात्)

14. निम्नक्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत। (केवलं प्रश्नद्वयम्) 2×1=2

क. निवसन्ति ख. आगमिष्यति ग. विषीदति

## खण्डः – 'ङ'

## पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

**15. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 17×1=17**

(क) 'यथा + इच्छया' इत्यत्र किं सन्धिपदम् ?

(i) यथेच्छया (ii) यथाच्छया

(iii) यथोच्छया (iv) यथिच्छया

(ख) 'सप्ताहान्ते' इत्यत्र कः सन्धिविच्छेदः ?

(i) सप्त + आहान्ते (ii) सप्ताह + अन्ते

(iii) सप्ताह + आन्ते (iv) सप्ता + अहन्ते

(ग) 'पुस्तकदासा:' इत्यस्मिन् पदे कः समासः ?

(i) द्विगुः (ii) अव्ययीभावः

(iii) कर्मधारयः (iv) तत्पुरुषः

(घ) 'विभवहीना:' इत्यस्य पदस्य विग्रहपदं किम् ?

(i) विभवेन हीना: (ii) विभवात् हीना:

(iii) विभवं हीना: (iv) विभवे हीना:

(ङ) 'वामेन' इत्यस्य पदस्य विलोमपदं किम् ?

(i) दक्षिणेन (ii) अवामेन

(iii) उत्तरेण (iv) पूर्वेण

(च) 'अध:' इत्यस्य पदस्य विलोमपदम् किम् ?

(i) नीचै: (ii) उपरि

(iii) अधोऽध: (iv) दक्षिणे

(छ) 'वृक्षः' इत्यस्य शब्दस्य पर्यायपदं किम् ?

(i) गगनः (ii) पत्रम्

(iii) तरुः (iv) पृथ्वीम्

(ज) 'पवन:' इत्यस्य पदस्य पर्यायपदं किम् ?

(i) अग्नि: (ii) जलम्

(iii) समीर: (iv) अम्बु

(झ) 'रुद् + तुमुन्' इत्यस्य संयोगे किं रूपम् ?

(i) रुदितुम् (ii) रोदितुम्

(iii) रोधुम् (iv) रोतुम्

(ञ) 'शयित्वा' इत्यस्मिन् पदे कः प्रत्ययः ?

(i) क्त्वा (ii) शतृ

(iii) शानच् (iv) तुमुन्

(ट) 'एकोनषष्टि:' इत्यस्मिन् पदे का संख्या?

(i) 95 (ii) 59

(iii) 49 (iv) 69

(ठ) '85' अङ्कस्थाने किं संख्यावाचीपदम्?

(i) पञ्चाशीतिः (ii) पञ्चसप्ततिः

(iii) पञ्चषष्टिः (iv) पञ्चनवतिः

(ड) 'हस्तनिर्मितानि मोदकानि' अत्र किं विशेष्यपदम्?

(i) हस्तनिर्मितानि (ii) मोदकानि

(iii) हस्तानि (iv) निर्मितानि


(ढ) 'भ्रान्तः बालः' अत्र किं विशेषणपदम्?

(i) भ्रान्तः (ii) भ्रान्तः बालः

(iii) बालः (iv) भ्रमितः

(ण) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत -


बालकः प्रातः .............. वादने उत्तिष्ठति।



(i) द्वादश (ii) त्रयः

(iii) सप्त (iv) पञ्च

(त) अहं प्रातः ................ भ्रमणाय गच्छामि।



(i) चतुर्वादने (ii) त्रयवादने

(iii) षड्वादने (iv) दशवादने

# अङ्कयोजना उत्तरसङ्केताश्च

## कक्षा – नवमी

## संस्कृत (2024-25)

**समयः - होरात्रयम्** **सम्पूर्णाङ्काः - 80**

**अवधातव्यम् –**

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निर्देशात्मकानि सन्ति । प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति ।
2. आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्तव्यः। यथा पठितगद्यांशे त्रयाणां प्रश्नानाम् उत्तरलेखनम् अभीष्टं परं छात्रः यदि चतुर्णां प्रश्नानाम् उत्तराणि लिखति तर्हि तत्र केवलं प्रथमत्रयाणां प्रश्नानां न अपितु यानि उत्तराणि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्।
3. यदि विद्यार्थिनः उत्तरलेखनसमये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः, न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः, न तु सम्पूर्णाङ्काः ।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः ।

| | **खण्डः 'क' अपठितावबोधनम्** | **10 अङ्काः** |
|---|---|---|
| **1.** | **अपठितगद्यांशाधारित-उत्तराणि :-** | |
| | **(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)।**<br>क गोदावरीतीरे ।<br>ख तण्डुलान् ।<br>ग अविचारितम् । | 2×1=2 |
| | **(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>क कपोतराज: तण्डुललुब्धान् कपोतान् प्रत्याह।<br>ख पक्षिण: शाल्मलीतरौ निवसन्ति स्म।<br>ग व्याध: रात्रौ तण्डुलान् विकीर्य जालं विस्तारितवान्। | 2×2=4 |
| | **(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकम् –**<br>**सर्वथा अविचारितं कर्म न कर्तव्यम्।** | 1 |

| | | |
|---|---|---|
| | **(द) यथानिर्देशम् उत्तरत-** **( केवलं प्रश्नत्रयम् )**<br>क प्रति+आह ।<br>ख लट् लकार: ।<br>ग विशाल: ।<br>घ प्रथमा । | 3×1=3 |
| **खण्डः 'ख' रचनात्मक-कार्यम्** | | **10 अङ्काः** |
| **2.** | **(क) पत्रलेखनम्**<br><br>परीक्षाभवनम्<br><br>तिथि: -<br>माननीया: पितृवर्या:<br>सादरं प्रणमामि।<br>मम (1) प्रथमसत्रीया परीक्षा समाप्ता। मम विद्यालयस्य अध्यापिका: शैक्षिक (2) भ्रमणाय नेष्यन्ति। एतदर्थं पञ्चशतं(3) रुप्यकाणि दातव्यानि । यदि भवत: (4)अनुमति: स्यात् तर्हि अहमपि गच्छेयम्। अतः (5) कृपया उपर्युक्तां राशिं प्रेषयित्वा माम् अनुगृहीतां कुर्यु:।<br>गृहे सर्वेभ्यो मम प्रणामः।<br>भवतां प्रिया,<br>रमा।<br><br>**(ख) चित्रं दृष्ट्वा रिक्तस्थानपूर्तिः**<br>क. अस्मिन् चित्रे एक: विशाल: वृक्ष: अस्ति।<br>ख. जले एक: नर: स्नानं करोति।<br>ग. वृक्षे बहव: खगा: सन्ति।<br>घ. चित्रे वृक्षस्य समीपे तड़ाग: अस्ति।<br>ङ वृक्षस्य अध: मयूर: नृत्यति। | 5×1=5<br><br><br><br><br><br><br><br><br><br><br><br><br>5×1=5 |
| **खण्डः 'ग' पठित-अवबोधनम्** | | **24 अङ्काः** |
| **3.** | **गद्याशं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत –**<br><br>प्रस्तुतगद्यांशः पाठ-5 **"भ्रान्तो बाल:"** इति पाठाद् उद्धृतः।<br>**अथवा**<br>प्रस्तुतगद्यांशः पाठ-3 **"गोदोहनम् "** इति पाठाद् उद्धृतः।<br>कस्यापि एकस्य गद्यांशस्य हिंदीभाषया प्रसङ्गं सरलार्थं च लेखनेन 1+3=4 अङ्काः प्रदेयाः। | 1×4=4 |

| | | |
|---|---|---|
| **4.** | **श्लोकं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत –**<br><br>प्रस्तुतश्लोकः पाठ-4 **“सूक्तिमौक्तिकम्”** इति पाठाद् उद्धृतः।<br>**अथवा**<br>प्रस्तुतश्लोकः पाठ-6 **“लौहतुला”** इति पाठाद् उद्धृतः।<br>कस्यापि एकस्य श्लोकस्य हिंदीभाषया प्रसङ्गं सरलार्थं च लेखनेन 1+3=4 अङ्काः प्रदेयाः। | 1×4=4 |
| **5.** | **सूक्त्योः भावार्थलेखनम् :-**<br><br>प्रदत्तसूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लेखनेन पूर्णाः अङ्काः 2+2=4 प्रदेयाः।<br><br>**अथवा**<br><br>**अन्वयस्य रिक्तस्थानपूर्तिः :- (उत्तराणि)**<br>1) वृत्तम्<br>2) याति<br>3) वित्ततः<br>4) क्षीणः | 2×2=4<br><br>**अथवा**<br><br>4×1=4 |
| **6.** | **पठितगद्यांशाधारित-उत्तराणि :-**<br><br>(क) शीतलमन्दसुगन्धपवनाः औषधकल्पं प्राणवायुं वितरन्ति।<br>(ख) सरितः अमृतस्वादु निर्मलं जलं प्रयच्छन्ति।<br>(ग) मानवः पर्यावरणं नाशयति।<br>(घ) "औषधकल्पं" विशेषणपदमस्ति। | 3×1=3 |
| **7.** | **पठितश्लोकाधारित-उत्तराणि :-**<br>(क) जन्तवः प्रियवाक्यप्रदानेन तुष्यन्ति।<br>(ख) दरिद्रता वचने न भवेत्।<br>(ग) जन्तवः इत्यत्र प्रथमा विभक्तिः । | 2×1=2 |
| **8.** | **रेखाङ्कितपदानि आधृत्य कोष्ठकात् चित्वा प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नत्रयम्)**<br>**उत्तराणि :-**<br><br>(क) कस्मात्<br>(ख) किम्<br>(ग) कम्<br>(घ) काभिः | 3×1=3 |

| | | |
|---|---|---|
| **9.** | प्रश्नपत्रे लिखितश्लोकान् विहाय '**शेमुषी भाग-1**' पुस्तकात् संस्कृतभाषया एकस्य शुद्धस्य श्लोकस्य लेखने 4 अङ्काः प्रदेयाः। त्रुटिपूर्णवर्तन्यै अङ्काः कर्तनीयाः। | 1x4=4 |
| | **खण्डः 'घ' अनुप्रयुक्त-व्याकरणम्** | **19 अङ्काः** |
| **10.** | (क) व्यञ्जनसन्धेः अथवा गुणसन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लेखनेन 1+1=2 अङ्कौ प्रदेयौ।<br>(ख) द्वन्द्वसमासस्य अथवा तत्पुरुषसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लेखनेन 1+1=2 अङ्कौ प्रदेयौ।<br>(ग) कर्मकारकस्य अथवा सम्प्रदानकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लेखनेन 1+1=2 अङ्कौ प्रदेयौ। | 1×2=2<br>1×2=2<br>1×2=2 |
| **11.** | **यथानिर्दिष्टानि शब्दरूपाणि - (केवलं प्रश्नचतुष्टयम्)**<br>**उत्तराणि :-**<br>(क) रामाय<br>(ख) बालकेन<br>(ग) लताया:<br>(घ) केषु<br>(ङ) मयि<br>(च) बालकानाम् | 4×1=4 |
| **12.** | **यथानिर्दिष्टानि धातुरूपाणि - (केवलं प्रश्नचतुष्टयम्)**<br>**उत्तराणि :-**<br>(क) अपठ:<br>(ख) लेखिष्यति<br>(ग) गच्छाम<br>(घ) भविष्यथ:<br>(ङ) पिबतु<br>(च) सेवसे | 4×1=4 |
| **13.** | **उचितविभक्तिप्रयोगं कुरुत। (केवलं प्रश्नचतुष्टयम्)**<br>**उत्तराणि :-**<br>(क) मित्रेण<br>(ख) नेत्रेण<br>(ग) पुत्राय<br>(घ) ग्रामं<br>(ङ) विवादेन | 4×1=4 |

| | | |
|---|---|---|
| **14.** | **उपसर्गान् पृथक् कृत्वा लिखत। (केवलं प्रश्नद्वयम्)**<br>**उत्तराणि :-**<br>(क) नि<br>(ख) आ<br>(ग) वि | 2×1=2 |
| | **खण्डः – 'ङ'    पाठाधारिताः बहुविकल्पीयाः प्रश्नाः** | **17 अङ्काः** |
| **15.** | **प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत –**<br>**उत्तराणि :-**<br>(क) (i) यथेच्छया<br>(ख) (ii) सप्ताह+ अन्ते<br>(ग) (iv) तत्पुरुष<br>(घ) (i) विभवेन हीना:<br>(ङ) (i) दक्षिणेन<br>(च) (ii) उपरि<br>(छ) (iii) तरुः<br>(ज) (iii) समीर:<br>(झ) (ii) रोदितुम्<br>(ञ) (i) क्त्वा<br>(ट ) (ii) 59<br>(ठ) (i) पञ्चाशीति:<br>(ड) (ii) मोदकानि<br>(ढ) (i) भ्रान्त:<br>(ण) (ii) क्त<br>(त) (iv) पञ्च<br>(थ) (iii) षड्वादने | 17×1=17 |